GAP भाषा
A MULTILINGUAL JOURNAL OF RESEARCH
( ISSN – 2582-8770 )
Globally peer-reviewed and open access journal.

# मुहूर्तेषु गुरुशुक्रयोः उदयास्तः विचारः

## प्रणवकुमार पूष्करभाई राज्यगुरुः

Ph.D. शोधछात्रः ,श्री महाराजा कृष्णकुमारसिंहजी-
भावनगर युनिवर्सिटि,भावनगर.
मो.नं – 9428108912 , 7016373941
Rajyaguru.pranav1@gmail.com

**उत्सवप्रियाः खलु मानवाः** अस्माकं शास्त्रे मनुष्यः सदैव उत्सवप्रियः दर्शितः । मनुष्यः जीवनस्य प्रत्येकक्षणम् आनन्देन जीवति । तस्य जीवने शुभकर्मे शास्त्रसम्मतोक्तानि वचनानि स्वीकृत्य अग्रे चलति ।सर्वप्रथमं सः शुभकार्यस्य प्रारम्भे शुभमुहूर्तस्य कामना करोति ।अयं शुभमुहूर्तं दृष्टं प्रथमं शुद्धकालं,दिनशुद्धिः,मासतिथिनक्षत्रयोगक्षयमासतिथयः अधिकमासः,वृद्धितिथिः,ग्रहणं,अशुभयोगः,गुरुशुक्रयोः अस्त,होलाष्टक,धनारकमीनारकौ रहितसमयः शुभ गण्यते । वयं मुख्यतया शुभमास-तिथि-वार-नक्षत्रं लग्नशुद्धिं च दृष्ट्वा शुभकार्यं कूर्मः परन्तु बहु वारम् एवमपि भवति यत् नक्षत्रतिथिशुद्धं भवति किन्तु ग्रह-अस्त भवति समान्यतः अल्पज्ञानेन गुरुशुक्रयोः अस्तज्ञाने द्विधा भवति अर्थात् गुरुशुक्रयोः अस्त मध्ये कानि कानि कार्याणी न भवन्ति तर्हि अद्य वयं गुरूशुक्रयोः अस्त विचारे तत्र वर्जितानि कार्याणि विषये चर्चा कूर्मः ।

ग्रहाणां द्विधा गती मुख्यतया भवति । वक्रोऽतिवक्र कुटिला च वक्री कथ्यते । मन्दा समा शीघ्रा च मार्गी कथ्यते । ग्रहाणामुदयास्तविचारः विषये पण्डित क्षेमानन्दमहाभागेन ज्योतिषाऽर्णवग्रन्थे सूर्यासिद्धान्तस्य प्रस्तुतश्लोक द्वारा कृतास्ति

**सूर्यादभ्यधिकाः पश्चादस्तं जीवकुजार्कजाः ।**
**ऊनाः प्रागुदयं यान्ति शुक्रज्ञो वक्रिणौ तथा ॥**
**ऊना विवस्वतः प्राच्यामस्तं चन्द्रज्ञभार्गवाः ।**
**व्रजन्त्याभ्यधिकाः पश्चादुदयं शीघ्रयायिनः ॥**[१]

अर्थात् यदा ग्रहाः सूर्येण सह स्युः परन्तु स्व स्वकालांशानामन्तरागमनेन अस्ताः भवन्ति तथा च कालांशाधिक्येन उदयाः भवन्ति । मंगल गुरु शनयः त्रयोग्रहाः सूर्यान्मन्दगतिमन्तः पश्चिमे अस्ताः पूर्वे च उदयाः भवन्ति । बुधशुक्रो शीघ्रगतिमन्तौ ग्रहौ पूर्वे अस्तौ पश्चिमे च उदयौ भवतः । यदा वक्रौ तदा पश्चिमे अस्तौ पूर्वे च उदयौ भवतः । चन्द्रौ द्रुतगामी सदैव भवति अतः पूर्वे अस्तः पश्चिमे च उदयौ भवति ।
सूर्यादि नवग्रहेषु गुरुशुक्रयोः उदयस्तौ विचारो महत्वपूर्णौ विषयो मन्यते । क्षेमानन्दजी गुरूशुक्रयोः उदयास्तविचारसम्बन्धे लिखितवान् यत्

**प्रागुद्गतः शिशुरहस्त्रितयं सितः स्यात्**
**पश्चाद्दशाहमिह पंच दिनानि वृद्धः ।**
**प्राक्पक्षमेव गदितोऽत्रवशिष्ट**
**मुख्यैर्जीवस्तु पक्षमपि वृद्धशिशुर्विवर्ज्य ॥**[२]

शुक्रः सूर्येण सह ८ अंश पर्यन्तं अस्तं तिष्ठति ८ अंशात् अधिकं भवति तदा उदयं प्राप्नोति । सामन्यतया ८ मासाः १५ दिनानि दृश्यते अनन्तरं मास द्वयम् अस्तं भवति एवं सम्पूर्णं चक्रं ५८४ दिनानि चलति । ग्रहः सूर्यस्य यावत् समीपम् अस्तं भवति तान् ज्योतिषस्य परिभाषायां कालांशः कथ्यते गुरोः ११ कालांशाः एवं शुक्रस्य ९ कालांशाः सन्ति । अयं कालांशे गुरुशुक्रौ सूर्यस्य पृष्ठे गच्छति तदा अस्तः अग्रे गच्छति तदा उदयो भवति ।
निर्णयसिन्धु ग्रन्थेऽपि अस्ति यत्

**बालः शुक्रौ दिवसदशकं पंचकं चैव वृद्धः**
**पस्चादह्नां त्रितयमुदितः पक्षमैन्द्रया क्रमेण ।**

https://www.gapbhasha.org/

**जीवो वृद्धः शुचिरपि तथा पक्षमन्यैः शिशू तौ**
**वृद्धौ प्रौक्तौ दिवसदशकं चापरैः सप्तरात्रम् ॥**[३]

गुरुशुक्रास्तादिषु वापी-कूप-तडाग-यज्ञ-चौलक्रिया-देवप्रतिष्ठा-उपनयनम्-विद्यारम्भः-गृहकर्म-कर्णवेधः-महादान-गुरूसेवा-तिर्थस्नानं-विवाहः-देवमन्दिरं-मन्त्रोपदेशः-देवद्अर्शनाइ कर्म्म त्यक्तव्यानि भवन्ति ।

**वापी कूप तडाग यज्ञ गमनं क्षौरं प्रतिष्ठा व्रतं**
**विद्या मन्दिर कर्णवेधेन महादानं गुरोस्सेवनम् ।**
**तीर्थस्नान विवाह देवभवनं मंत्रादि देवेक्षणं**
**दूरेणैव जिजीविषु परिहरेदस्ते गुरौभार्गवे ॥**[४]

शतातपग्रन्थे लिखितं यत् अस्तंगते गुरौ-शुक्रे बालवृद्धेमलिम्लुचे । उद्यापनमुपारंभव्रतानां नैव कारयेत् । अस्मिन् विषये मुहूर्तचिन्तामणौ श्लोकं वर्तते

**वाप्यारामतडागकूपभवनारम्भप्रतिष्ठे व्रता-**
**रम्भोत्सर्ग वधूप्रवेशन महादानानि सोमाष्टके ।**
**गोदानाग्रयण प्रपाप्रथमकोपाकर्म्म देवव्रतं**
**नीलोद्वाहमथातिपन्न शिशुसंस्कारान् सुरस्थापनम् ॥**
**दीक्षा मौञ्जि मुण्डनमपूर्व देवतीर्थेक्षणं**
**संन्यासाग्निपरिग्रहौ नृपतिसन्दर्शाभिषेको गमम् ।**
**चातुर्मास्यसमावृति श्रवणयोर्वेधं परीक्षां त्यजेत्**
**वृद्धत्वास्तशिशुत्व इज्यसितयोर्न्यूनाधिमासे तथा ॥**[५]

निलोद्वाह शब्दस्य अर्थे अग्रे लिखति यत्
नीलोद्वाहः नीलशब्दोवाच्यः काम्योवृषोत्सर्गः नत्वेकादशाहे क्रीयमाणः ।
कुत्रचित् गुरुशुक्रयोः अस्तयोः परिहार अप्यस्ति यथा

**सीमन्त जातकादिनि प्रासनान्तानि यानि वै ।**
**नदोषो मलमासस्य मौढ्यस्य गुरुशुक्रयोः ॥**[६]

चैत्रमासे सूर्यः यदि मीनराशौ भवति तदा ब्राह्मण बटुकस्य उपनयन संस्कारः उत्तमः भवति तदा गुरु-शुक्र अस्तं न पश्यामः ।

**चैत्रमासे भास्करे मीनसंस्थे कुर्यान्मौजीबन्धनं ब्राह्मणानाम् ।**
**शुक्रस्यान्तं वाक्पतीनावलोक्यं नैवग्राह्याः चन्द्रगुर्वोश्चशुद्धिः ॥**[७]

निर्णयसिन्धु ग्रन्थे लिखितं यत्

**बाले वा यदि वा वृद्धे शुक्रे वास्तं गते गुरौ ।**
**मलमास इवैतानि वर्जयेद्देवदर्शनम् ॥**
**नीचस्थे वक्रसंस्थेऽप्यतिचरणगते बालवृद्धास्तगे वा**
**सन्यासो देवयात्राव्रतनियमविधिः कर्णवेधस्तु दीक्षा ।**
**मौञ्जीबन्धोऽङ्गनानां परिणयनविधिर्वास्तुदेव प्रतिष्ठा**
**वर्ज्याः सद्भिः प्रयत्नात्रिदशपतिगुरौ सिंहराशिस्थिते च ॥**
**गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे ।**
**गृहकर्म व्रतं यात्रा मनसापि न चिन्तयेत् ॥**[८]

https://www.gapbhasha.org/

अनादि कालत एव मानवः स्वजीवनं व्यवस्थियितु सूर्यप्रदत्तामहोरात्रस्य मर्यादां स्वीकृतवान् । यथा दैनिकानि मुख्य कार्याणि सूर्योदयात् सूर्यास्तपर्यन्तं तथा च शयनादिविश्रामकृत्यानि सूर्यास्ततः सूर्योदयपर्यन्तं क्रियन्ते । एवमेव मानवजीवनस्य महत्वपूर्णानि कार्याणि निर्विध्नानि तथा त्वरितफलदायिकानि भवेयुः एतदर्थं विचारशीलैः ऋषिमुनिभिः कालस्य शुभाशुभा संज्ञा कृता तथा च शुभकालस्य निर्णयः कृतः ।

शुभकार्यसिद्ध्यर्थं ग्रहाणां बलवदवस्था वाञ्छनीया मन्यते । अतः एवं प्रकारस्य कालखण्डस्य निर्णयः क्रियते यत्र अधिकाः ग्रहाः बलवन्तोऽनुकुलाश्च स्युः अर्थात् अस्ताः निर्बलाः न स्युः अपितु स्वगृहिणो मूलत्रिकोणास्थाः उच्चाः मित्रराशिस्थाः शुभग्रहयुताः दृष्टाः वा स्युः एतत्सर्वं सम्यग् विचार्य यदाऽपि कश्चिदनुकुलः कालः कार्यसिद्ध्यर्थं सुनिश्चितं क्रियते तदेव मुहूर्तं कथ्यते । मुहूर्ते विधिपूर्वक कार्यकरणेन इष्टप्राप्तिः अनिष्ट परिहाराश्च भवति एवमेव धर्मशास्त्राणां भावोऽस्ति ।

ग्रहाणामुदयास्तसम्बन्धिविचारो मुहूर्तस्यैकमभिन्न मङ्गसति । एतदर्थं ग्रहाणां विभिन्नगतीनामानयनं तज्जनितञ्चोदयास्तसम्बन्धिग्रहावस्थाबोधकरणं प्रथमं सोपान भवति । ग्रहाः सूर्येण सह अग्रे पृष्ठे वा कति कालांशान्तरमस्ताः कति कालांशाधिक्येनोदयाः भवन्ति यावदेतज्ज्ञानं न भवति तावच्छुभाशुभस्य कालस्य भेदो न कर्तुशक्यते । तथा च ग्रहाणां बलाबलमपि निर्णेतुं न शक्यते न च जातकग्रन्थेषु वर्णितं ग्रहाणां बलाबलाधारितं फलविचारं कर्तुं वयमसमर्थाः । अतः ग्रहणामुदयास्तहहानमत्यावश्यकमस्ति ।

यदि ग्रहाणामुदयास्तविचारं वयं त्यजेम तदा संहितान्तर्गतं मुहूर्तप्रकरणमस्तित्वहीनं भविष्यति । यतो हि गर्भाधानतो मृत्युपर्यन्तं सकलाः संस्काराः मुख्यतो यथा पुंसवनम् , सोमन्तोन्नयनम् , जातकर्म , नामकरणम् , अन्नप्राशनम् , कर्णवेधः , चूड़करणम् , विद्यारम्भः , यज्ञोपवीतम् ,केशान्तः ,विवाहः , अग्नयाधानान्तः , प्रेतकृत्यम् आदि अनेकसंस्काराणां मुहूर्तम् , यज्ञ-याग-यात्रा-गृहनिर्माण-गृहप्रवेशादीनां मुहूर्त वापी कूप तडागादिनिर्माण-वाटिका-मूर्तिनिर्माण-मन्दिरप्रतिष्ठादीनाम् , मुहूर्तम् , एकादशी प्रदोष-अनन्त-शिवरात्रीदीनां व्रतामारम्भस्तथा तेषामुद्यापनं वधूप्रवेश मन्त्रग्रहण सर्वप्रथम देवतीर्थदर्शन-सन्यासग्रहण-राजदर्शन-राज्यभिषेक-प्रथमयात्रा चातुर्मासयाग-समावर्तन-मोञ्जमोक्षादीनां मुहूर्तज्ञानार्थं गुरुशुक्रोदयास्तस्य विचारोऽत्यन्तावश्यकः ।

उदयास्तस्य विचारं विना शुभकालस्य ज्ञानं भवितुं न शक्यते । शुभकालेऽवोधे सति सम्पूर्णानि माङ्गलिककार्याणि महत्वपूर्णानि कृत्यानि कर्तुं कथं शक्यन्ते । येन मानव जीवनमव्यवस्थितं भविष्यति ।

## संदर्भ

[1] सूर्यसिद्धान्तः उदयास्ताधिकारः श्लोक २-३
[2] ज्योतिषाऽर्णवः ग्रन्थ पृ. ७४
[3] निर्णयसिन्धुः प्रथमपरिच्छेदः पृ.१२
[4] बालबोध ज्योतिषसारसमुच्चयः शास्त्रार्थ प्रकरणम् श्लोक १६
[5] मुहूर्तचिन्तामणिः शुभाशुभप्रकरणम् श्लोक ४६-४७
[6] बालबोध ज्योतिषसारसमुच्चयः संस्कारमुहूर्तप्रकरणम् श्लोक ९
[7] बालबोध ज्योतिषसारसमुच्चयः
[8] निर्णयसिन्धुः प्रथमपरिच्छेदः पृ. ११

https://www.gapbhasha.org/